# वैदिक वाङ्गमय नीतिशास्त्रस्य परिशीलनम्

डॉ. ममता कुमारी*

केयं नीतिः? तच्छास्त्रं किमिति जिज्ञासायां तद् बोधक प्रमाणं गवेषणायां मनीषिणः कृतयत्नाः भवन्ति। नीतिरिति नयनम्। वैदिक वाङ्मये पुंसामानयनं वैदिक आचार संहितायाः शासनान्तर्गते, तदस्ति वैशिष्ट्यं वैदिकवाङ्मयस्य। वेदेषु भवा वैदिकी। लोकेषु भवा च लौकिकी। च एव वैदिकास्त एव लौकिका इति वैदिकी वाङ्.मयी नीतिरिति। प्रतिशाख्यग्रन्थस्य वचनमिदम्। तत्र चान्विष्यते मानवानां धर्मः। न भवति स्वार्थ–नोदिता बुद्धिर्गवेषकाणाम्। ते चिन्तकाः व्यापकनयेन विचारयन्ति। तेषां धियो धारककर्मशक्तयश्च सर्वजनहित–साधिकाः भवन्ति। एतादृशेषु प्रेक्षावत्सु जनेषु भगवतः प्रकाशो भवति।

सामान्यो मनुष्यः कर्मणा ज्ञानेन वा परमं कारूणिकं प्रभुं ध्यायति। कथम् एतादृशं भवति? यतो हि परमप्रभोर्व्यापकधर्मणा नीति–नियमेन, व्यवस्थया चेति।

दिव्यलोकम्परितोऽपि विविधधर्माः स्वतः सञ्चालिताः स्वतः प्रकटयन्ति यो नाम परमपुरूषस्य धर्मः सः खलु सहस्त्रांशुरिव शीतांशोर्ज्योत्सनैव, नक्षत्राणां शुभ्रज्योतिरिव न केवलं पार्थिवम्प्रति, अपितु सुक्तात्मानं प्रति चकास्ति। यत् क्षेत्रं शारीरिकमास्ते, बुद्ध्यात्मकं वा तदुभयं तत् शुभ्रज्योत्सनयाऽवभासते। अद्यस्तने मन्त्रे तथ्यमेतद् उद्घाटितमास्ते –

**विभ्राड्. बृहत सुभृतं वाजसातमं धर्मन् दिवो धरूणे सत्यमर्पितम्।**
**अमित्रहा वृत्रहा दस्युहन्तमं ज्योतिर्जज्ञे असुरहा सपत्नहा।।** [1]

अर्थात् धौर्ज्योतिष्मति धर्मे विशेषरूपेण द्योतमत् सर्व विपुलं सर्व पोषणं बल प्रापकञ्च सत्यं निहितम् अस्ति। असावेव शत्रुहन्ता, असुरसंहारकः प्रतिपक्षीणां विनाशकश्चेति प्रकाशाः प्रकटयाञ्चक्रुः।

अत्र धर्मशब्दः खलु एकवचने प्रयुकतः, नीति शब्द पर्यायभूतश्च इति। द्यौश्चेक एव धर्मः प्रकाशकरणम् इति। प्रकाशस्यास्य श्रोतः खलु परमात्मा सर्वोत्तमप्रकाशमयः। द्यौश्चप्रकाशोऽयं बहिर्भूतोऽस्ति यतश्च प्रज्ञायाः प्रकाश आभ्यन्तरिको महती शक्तिमेकां सङ्केतयति। एतस्या महत्यः शक्तेः गर्भादाविर्भवति सत्यमविनाशकमिति। सत्यादेव विनश्यति विविधमरिं प्रतिपक्षणमसुरञ्चेति। तमसावृताः कीटकाः ज्योतिषि न स्थातुं शक्नुवन्ति। अ्द्यस्तने मन्त्रे एकवचने धर्मः प्रयुक्तोऽस्ति– **त्वं विश्वस्माद् भुवनात् पासि धर्मणासुर्यात् पासि धर्मणा।।** [2]

*नेट, ग्राम–पॉड, पोस्ट–चकबहाउद्दीन, भाया–दलसिंह सराय, जिला–समस्तीपुर, बिहार–848114



हे देवः रक्षसि धर्मेण समात्तभुवने वस्तुजातोद्भवाद्य पासि त्वम् अस्मान् शत्रूणांद्यातकाक्रमणात्। अस्त्यत्र धर्मः पुण्यं कर्म, नीतिमयः सदाचारश्च इति। पुण्यवतां सतां सहचरः प्रभुरस्ति। प्रभुमधिगतशरणाः खलु निरापदाः सन्ति। यो नाम कश्चन धर्मः सः नीतिशास्त्रम् अवलम्बते। विदधात्यसे जीवजातमधिकं प्रियं सत्वरमीश्वरस्य तद् यथा ऋग्वेदे –

**ते सूनवः स्वपसः जगतश्च धर्माणि पुत्रस्य पाथः पदमद्वयाविनः।।** [3]

अर्थात् सुवते मातरो धावापृथिव्यौ ऋतं सत्यञ्च प्राणं रयिञ्च सुशोभना प्रकृति देवी च शोभनकर्माणं पुत्रं नीतिशास्त्र निपुणं सूते।

**ऋतेन ऋतं धरूणं धारयन्त यज्ञस्यशाके परमे व्योमन्। दिवो धर्मन्धरूणे सेदुषो नृञ्जातैरजातॉं अभि ये ननक्षुः।।** [4]

ये पुमांसः खलु सर्वेषां धारण कर्त्तारमृतं स्वजीवनाङ्गभूत विदधति ऋतं सदाचारनियमान् नीति पथो वा ते यज्ञस्याद् भुतसामर्थ्यात् परमव्योम्नः प्रकाशं धर्तरि यज्ञस्तम्भभूते सूर्येऽस्माकं जन्मीनामपेक्षया अजातां प्रेरयित्रीं देवताः दिव्यशक्तिश्च सद्यः समधिगच्छन्ति। सत्पुरूषो व्याचष्टे– माइट इज राइट 'ऋतमेव बलम' इति।

ऋतम्भरा देवाः। सूर्य एव तेषां निवासस्थानम्। विहरन्ति स्वैरं नित्यशो ऋतम्भराः देवाः। सूर्यस्य किरणात् वाहनानि विधाय। प्रागभिहितं तदृतं सृष्टेः प्राङ्नियमः प्रथमा नीतिः। **नास्ति सत्यात् परो धर्मः इति वैदिकवाङ्मयी नीतिः। बूमो वयमृतः न चानृतमिति। सुखार्थः सर्वभूतनां मताः सर्वा प्रवृत्तयः परं दृश्यते जगति एतद्विपररीतम्। तथा चोक्तम्–यच्चिन्तितं तदिह दूरतरं प्रयाति यन्मनसापि न कृतं तदिहाभ्युपैति। प्रातर्भवामि वसुधाधिप चक्रवर्ति सोऽहं वज्रामि विपिन जलिटः तपस्वी।।** इति नीतिः। भवेदे स्माकारणादेनदिति तदा दुःखस्यैकमात्र कारणमाचष्टे महर्षि पतञ्जलिः– **अविद्याऽस्मिता रागद्वेषाभिनिवेशाः पञ्च क्लेशाः** सर्वतो दृष्टिपथम् अवतरन्ति। यावदेषां कलेशानां नाशो न भवति न तावत्सुखम्। यादृशं कर्म करोति जनः तादृशमेव फलं भुङ्क्ते। इष्टे चेज्जनः यदहं सुखी स्याम् दुःखं मे सर्वस्मे कालाय विलयमाप्नुयात्, विशुद्धचरितः यशस्वी वा भूयासम् स्याद् विजयो मे चरणचञ्चरीकः शान्तेशीतलाछायाः अस्माकं जीवनं दुःखातपाद्रक्षेत स्वाभिमानमस्मदीयं हिमालयव दुच्चशिरस्कमाप्नुयात्। भिन्द्यातु दुर्भाग्यदुर्गे पुरूषार्थोऽस्मदीयः छिन्द्याच्च पराजयपाशान तर्हि निधत्त सत्यस्य मार्गे पदम् न हि तीव्रतरं किचिंत अनृतादिह विद्यते।। **अश्वमेघ सहस्त्रञ्च सत्यञ्च तुलया धृतम्। अश्वमेध सहस्त्रहि सत्यमेव विशिष्यते** इति नीतिः।

सर्वदेशस्य स्वीया संस्कृतिर्भवति। सैव संस्कृति नीतिं निर्धारयति। परस्माद् देशाक्रम भयादेव रणनीतिर्निधायते। राजनीतिरिति प्रशस्यते। धर्मनीति कौटिल्य नीति रीति कतिधा नीयतो निर्धारयन्ते।

वयं भारतीयाः स्म। अस्माकं देशस्य भारतस्य संस्कृतिः प्राचीनतमा। यस्य देशस्य यादृशी संस्कृतिर्भवति तस्य नीतिरपि तादृशीति निश्चप्रचम्। अद्यत्वे संस्कृतिः शब्दः बहुधालब्धः प्रचारः। कोऽयं शब्दः? कोऽस्यार्थ? इति विचारणामर्हति। यतः कस्यापि शब्दस्य यावद् यर्थाथ प्रतिपत्तिर्न भवित, न तावत् सः स्वसारस्य लब्धमर्थ प्रत्यायति। अतः तावत् संस्कृतिपदस्य व्युत्पत्तिःलभ्योऽर्थः विमर्शनीयो भवति। सम् पूर्वक कारणद्यर्थकात् कृ धातोः क्तिन् प्रत्यये कृते सति शब्दोऽयं निष्पद्यते। संस्करणं हि कस्यचिद् वस्तुनः सम्यक्तयाकरणं निष्पादनं नाम।

यथा हि रत्नोपलतः शाणोल्लेखादिनां तद् अन्तर्गतर्गुणानां बहिराविष्करणं रत्नकृता तथैव मानवानां अन्तर्गुणानां अध्यात्मत्वादीनां संस्कारदिभिः यत् संस्करणं तदेव हि संस्कृतिपदेनोच्यते। मानवजीवनस्य वकिासाय यद् वविधिं संस्करणाधानं तदेव संस्ःति पदावच्यम्। यदा जगति राष्ट्रन्तरनिवासिनो मानवः पशव इव अज्ञानिन आसन्, तदा भारतीयाः सर्वासु विद्यासु सकलासु कलासु च परं पटुताम् अगाहन्तेति ऐतिहयविदो विदन्ति। अस्यैव भारतवर्षस्य विद्वदभ्यः ब्रह्मणेभ्यः चे सर्वे इतरदेशवासिनः स्वं–स्वं चरित्रम् अशिक्षन्त इति मानवचनम् एवद्देश प्रसूतस्य सकाशादग्रजन्मः स्वं स्वं चरित्रे शिक्षेरन् पृथिव्यां सर्वमानवाः।। अयमेव देशः सर्वेषामपि देशानां गुरूः यस्य संस्कृतेश्च दिग्दर्शनम्–सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। सर्वे भद्राणि पश्यन्तु माँ कश्चिद् दुःखभागभवेत। इति नीतिः। मागृधः कस्यस्विद्वनम्। स्वद्यया परिहिता। सत्यं वद धर्मं चर। अहिंसा परमो धर्मः। संगच्छध्वम् संवध्वम्। मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षे, कृण्वन्तो विश्वमार्यम्। असतो मा सद्गमय तमसो मा ज्योतिर्गमय इत्यादि उद्धरणैः स्थालीपुकन्यायेन ज्ञायते भारतीया आस्तिक्य संस्कृतिरियम्। ईश्वर सत्ता अंगीकारः खलु आस्तिक्यम्।

चराचरं जगदिदमीश्वरकर्तृकम् निर्मितम् ईश्वरेण मानवानां कल्याणकामनया। तद्यथा–ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत। तेन त्यक्तेन भुंजीथा मागृधः कस्यस्विद्वनम्। वैदिक वाङ्मये प्रार्थनारूपेण श्रद्धारूपेण, शिवसंकल्परूपेण, अभयत्वप्रदान–स्वरूपेण इत्यादिभिर्नीत्यः सन्धर्यन्ते।

**अग्नेनय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान।**
**युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते भूयिठान्ते नम उक्तिं विधेम।।** [5]

श्रद्धा–

**श्रद्धायाग्निः समिध्यते श्रद्धया हूयते हविः।**
**श्रद्धया भगस्य मूर्धनि वचसा वेदयामसि।।** [6]

शिवसंकल्परूपेण –

**यत् प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्राजसु।**
**यस्मान्न ऋते किन कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु।।** [7]



अद्यस्तनेभ्यो मन्त्रेभ्यश्च नीतिज्ञाः अभयत्वमाप्नुवन्ति–

**यतो यतः समीहसे, ततो नोऽभयं कुरू।**
**शन्नः कुरू प्रजाभ्योऽभयं नः पशुभ्यः।।** [8]

आदर्श सामाजिक जीवनम्–

**संगच्छध्वं संवदध्वं सं वो मनांसि जानताम।**
**देवाभागं यथा पूर्वे संजानानां उपासते।।** [9]

वैदिकवाङ्मयेषु अखण्डकल्पना राष्ट्रस्य कृता विद्यते। राजसभा कीदृशी भवेदिति अथर्ववेदे (7/12/1)। तत्रैव च सभसदः कीदृशाः भवेयुरिति नीतयः समेषां नागरिकाणां ह्रदयङ्गमा भवेयुरिति विद्वांसो विदाड्कुर्वन्तु (अथर्ववेद 7/12/3)। ऋग्वेदे स्वराज कल्पना नीतिशास्त्रस्य प्राणाधारभूता व्याहुता विद्यते– **आ यद् वामीयचक्षसा मित्र वयं च सूरयः। व्यचिष्ठे बहुपाय्ये यतेमहि स्वराज्ये।।** [10]

यजुर्वेदे 22/22 मन्त्रे राष्ट्र संकल्पनमाम्नातं संलक्ष्यते। राष्ट्रस्य चतुर्वगविशिष्टजातीय संस्कारपर्वसु मुण्डन उपनयन विवाहादीनामवसरेषु दुर्वाक्षतमन्त्र रूपेण मन्त्रमिमुच्यार्थ राष्ट्रसंकल्पान्तरे यजमानेभ्यो नागरिकेभ्यः संस्कारकामेभ्यश्च शुभाशीर्वादाः वैदिकेः पुरोहितैर्दीयन्ते। **ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्छसी जायतामराष्ट्रे राजन्यः शूरऽइषव्योऽति व्याधी महारथो जायतां दोग्घ्री धेनुर्वोढानऽवानाशुः सप्तिः पुरंघ्रिर्योषा जिष्णू रथेष्ठाः सभेयो युवा अस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो न ओषधयः पच्यन्ताम् योगक्षेमो नः कल्पताम।**

ब्रह्मणः सृष्टिकर्तृत्वात्तं प्रति ब्राह्मणैरूच्यते। तद्यथा– हे ब्रह्मण, अस्य यजमानस्य यजनशीलस्य राज्ञः अन्त्र तु यजामनस्य आशीर्वादार्हस्य देवदत्तदेरिति यावद् राष्ट्रे राज्ञः पक्षे तु राज्ये अन्यत्र तु राष्ट्रे अधिकार प्रदेशे इति यावत् ब्रह्मवर्च्चसी यज्ञाध्ययनशीलो ब्राहमणः आजायताम् उत्पद्यतामित्यर्थः। अस्माकम् आशीः प्रदानकतृणां ब्राह्मणानाम् आर्शीवचसेति शेषः। तथा राजन्यः क्षत्रियश्चैवम्भूत आजायताम। किम् भूतो राजन्य इति अपेक्षायाम् उच्यते। शूरः पराक्रमी इत्यर्थः। **शूरः विक्रान्तौ** शूरयतीति शूरः तथा इषव्यः इषुभिर्विध्यतीति इषव्य वाणयोद्ध इत्यर्थः। यद्वा इषौ कुशलः इषब्धः वाणपक्षेपनिपुण इत्यर्थः। तथा अति व्याधी अत्यंतं विध्यति इति अति व्याधी अत्यन्तं शत्रु भेदनशील इत्यर्थः। तथा महारथः एक सहस्त्रं जयीनीति स महारथः एवं भूतो राजन्योस्य राष्ट्र विषये उत्पद्यताम इति भावः। तथा दोग्धी दुग्धपूरयित्री धेनुः सकृत्प्रसूता पयस्विनी गौरित्यर्थः। सा आजायतामित्यनुषंगः। तथा वोढा वहनशीलः अनंड्वान अनः शंकटं वहतीति अनंड्वान वृषभः आजायताम्। तथा रथेष्ठाः रथे तिष्ठति इति रथेष्ठा (अत्र क्विप सप्तम्या अलुक च बोध्यः) रथे स्थितो युयुत्सुर्नरो जिष्णु जयनशीलः काश्चिद्वीर पुरुषश्चाजायताम्।

अस्य यजमानस्य यजनशीलस्य राज्ञः अन्यत्र तु आशीर्वादार्हस्य दवेदत्तदेरिति यावद् युवा समर्थः सभेयः सभायां योग्यः वीरः पुत्रः उत्पाद्यताम्। तथा यदा वयं राष्ट्रियाः कामयामहे वृष्टीर्वातु, भवन्तु फलवत्य ओषधयः वनस्पतयः। अस्माकं योगक्षेमः सन्तिष्ठताम्। अलब्धलब्धो योगः तत्परिपालनञ्च क्षेम इति बुधाः परिशीलयन्ति। एवावता संक्षेपेण राष्ट्रकल्याणार्थ समत्व भावनां द्रढ़ीकर्त्तुं नीतिशास्त्रस्य च आलोके वैदिकवाङमयस्य सभ्य समाजेष्वनिवार्यत्वं विधीयत इति।

यत् तथ्यं प्राक् प्रतिपादितं तदिह समासतो मया प्रदीयते। चत्वार एव वेदाः सन्ति। ऋग्वेदः यः खलु अग्निमयः। यजुर्वेदो द्वितीयो वेदः कृष्णः शुक्लश्चेति। वेदस्य द्वै विध्यम् सामवेदः खलु तृतीयो वेदः। आदित्य मयो हि सामवेदः तत्र च वेदमन्त्रः अधस्तनः –

**ॐ चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरूणस्याग्ने ।**
**आप्रा धावा पृथिवीऽअन्तरिक्षं सूर्य्यआत्मा जगतस्तस्थुषश्च।।**

अर्थात् मन्त्रोऽयं यजुर्वेदस्य संध्या प्रकरणे सूर्योप्रस्थानकः। मित्रस्य वरूणास्य अग्नेः चक्षुः अक्षिभूतः नेत्ररूपः देवानाम् मित्रादिव्यतिरिक्तानाम् अन्येषां देवानाम् अनीकं मित्रादिव्यतिरिक्तानाम् अन्येषां देवानाम् अनीकं समूहः तेजः समूहः तेज इति वा जगतः जङ्गमस्य तस्थुषः स्थावरस्य च सकलप्राणिजातस्य आत्मा सकलसंसारमयः सूर्य्यः चित्रम् आश्चर्यं यथा स्यात्तथा उद्गात् प्राच्यां दिशि उद्गच्छति इत्यर्थः।

अर्थात् जगतः चराचरस्य आत्मा सूर्य एव इति अवगन्तव्यम्।

अथर्ववेदस्य खलो विज्ञानमयः। आयुर्वेद शास्त्रस्य प्राणभूतः मारण मोहन वसीकरण इति मन्त्राणां आकरभूतोऽयं अथर्ववेदः। एतावता वैदिकमन्त्रस्य सूक्तयः नीतिशास्त्रम् आचक्षते। सर्वा विद्याः सर्वा कलाः सप्तलोकाश्चेति नीति प्रदाः सत्यमार्गगामिनः च इति विद्वांसो विदाङ् कुर्वन्ति इति दिक्।

**सन्दर्भ ग्रन्थ**


1. ऋग्वेद–10 / 170 / 2
2. ऋग्वेद 1 / 134 / 5
3. ऋग्वेद 1 / 159 / 3
4. ऋग्वेद 5 / 15 / 12
5. यजर्वेद 30 / 03 / 14
6. ऋग्वेद 10 / 151 / 1
7. यजुर्वेद 34 / 1 / 3
8. यजुर्वेद 36 / 22
9. ऋग्वेद 10 / 191 / 2
10. अथर्ववेद –05 / 66 / 6
11. ऋग्वेद– 1 / 115 / 1


# Citizenship Training for Political Socialisation and Participation

**Dr. Navin Kumar Pandey***

Political socialization is the process by which political culture are maintained and changed. Through the performance of this function, individuals are inducted into the political culture, their orientations towards political objects are formed.[1]

Almond has preferred political socialization and political culture instead of public opinion and citizenship training.[2] It stands for the learning process by which forms and behaviour acceptable to a well-running political system are transmitted from one generation to another. Thus, political socialization is the gradual learning of the norms, attitudes and behaviour acceptable to an on-going political system.[3] Political socialization has been defined as those developmental process through which persons acquire political orientations and pattern of behaviour.[4]

Herbert Hyman views political socialization as a continuous learning process involving both emotional learning and manifest political indoctrination and as being mediated by all the participations and experiences of the individual and not simply by early family experiences.[5]

The citizenship training would encompass all political learning whether formal or informal, whether deliberate or unplanned, at every stage of the cycle of one's life. It includes not only explicitly political learning which effect political behaviour, but also the learning of political irrelevant social attitude and the acquisition of politically relevant personal characteristics.

Thus the main emphasis of citizenship training is to achieve political stabilization. In order to function smoothly every political system must have process of the internationalisation of political norms.[6]

Political socialization is the most important link between the social and political systems, but may considerably vary from one system to another from a political point, political socialization is extremely important as the process by which individuals becomes involved to varying degree in political system - in political participation.[7]

***Assistant Professor, J.B.S. College, Bhingari Bazar, Bhatpar rani, Deoria (U.P.)**